# shrIsubrahmaNyamUlamantrastavaH

# શ્રીસુબ્રહ્મણ્યમૂલમન્ત્રસ્તવઃ

## Document Information

Text title : subrahmaNyamUlamantrastavaH

File name : subrahmaNyamUlamantrastavaH.itx

Category : subrahmanya, mantra

Location : doc_subrahmanya

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail, PSA Easwaran

Description-comments : Subrahmanya Stuti Manjari, Mahaperiaval Trust

Acknowledge-Permission: Mahaperiaval Trust

Latest update : December 23, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

shrIsubrahmaNyamUlamantrastavaH

# શ્રીસુબ્રહ્મણ્યમૂલમન્ત્રસ્તવઃ

ૐ શ્રીગણેશાય નમઃ ।

અથાતઃ સમ્પ્રવક્ષ્યામિ મૂલમન્ત્રસ્તવં શિવમ્ ।
જપતાં શ‍ૃણ્વતાં નૃણાં ભક્તિમુક્તિપ્રદાયકમ્ ॥ ૧॥

સર્વશત્રુક્ષયકરં સર્વરોગનિવારણમ્ ।
અષ્ટૈશ્વર્યપ્રદં નિત્યં સર્વલોકૈકપાવનમ્ ॥ ૨॥

શરારણ્યોદ્ભવં સ્કન્દં શરણાગતપાલકમ્ ।
શરણં ત્વાં પ્રપન્નસ્ય દેહિ મે વિપુલાં શ્રિયમ્ ॥ ૩॥

રાજરાજસખોદ્ભૂત રાજીવાયતલોચન ।
રતીશકોટિસૌન્દર્ય દેહિ મે વિપુલાં શ્રિયમ્ ॥ ૪॥

વલારિપ્રમુખૈર્વન્દ્ય વલ્લીન્દ્રાણીસુતાપતે ।
વરદાશ્રિતલોકાનાં દેહિ મે વિપુલાં શ્રિયમ્ ॥ ૫॥

નારદાદિમહાયોગિસિદ્ધગન્ધર્વસેવિત ।
નવવીરૈઃ પૂજિતાઙ્ઘ્રે દેહિ મે વિપુલાં શ્રિયમ્ ॥ ૬॥

ભગવન્ પાર્વતીસૂનો સ્વામિન્ભક્તાર્તિભઞ્જન ।
ભવત્પદાબ્જયોર્ભક્તિં દેહિ મે વિપુલાં શ્રિયમ્ ॥ ૭॥

વસુ ધાન્યં યશઃ કીર્તિં અવિચ્છેદં ચ સન્તતેઃ ।
શત્રુનાશનમદ્યાશુ દેહિ મે વિપુલાં શ્રિયમ્ ॥ ૮॥

ઇદં ષડક્ષરં સ્તોત્રં સુબ્રહ્મણ્યસ્ય સન્તતમ્ ।
યઃ પઠેત્તસ્ય સિદ્ધ્યન્તિ સમ્પદશ્ચિન્તિતાધિકાઃ ॥ ૯॥

હૃદબ્જે ભક્તિતો નિત્યં સુબ્રહ્મણ્યં સ્મરન્બુધઃ ।
યો જપેત્પ્રાતરુત્થાય સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૦॥

ઇતિ કુમારતન્ત્રાર્ગતં શ્રીસુબ્રહ્મણ્યમૂલમન્ત્રસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Sivakumar Thyagarajan shivakumar24 at gmail.com,
PSA Easwaran

*shrIsubrahmaNyamUlamantrastavaH*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*